International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2017; 3(3): 416-422
© 2017 IJSR
www.anantaajournal.com
Received: 14-03-2017
Accepted: 19-04-2017

**डा. नृसिंहनाथगुरु**
सहायकाचार्यः, साहित्यविभागः
कलियाचक-विक्रमकिशोर-
आदर्शसंस्कृतमहाविद्यालयः
हेरिया, पूर्वमेदनीपुरम्, पश्चिमबङ्ग,
भारत

**Correspondence**
**डा. नृसिंहनाथगुरु**
सहायकाचार्यः, साहित्यविभागः
कलियाचक-विक्रमकिशोर-
आदर्शसंस्कृतमहाविद्यालयः
हेरिया, पूर्वमेदनीपुरम्, पश्चिमबङ्ग,
भारत

# व्यञ्जनाशक्तिविचार

**डा. नृसिंहनाथगुरु**

**प्रस्तावना**

व्याकरण – मीमांसा – तर्कादिशास्त्रे शब्दशक्तिविचारः सूक्ष्मातिसूक्ष्मरीत्या विद्यते। वैयाकरणाः मीमांसकाः नैयायिकाश्च अभिधा तात्पर्या लक्षणा चेति तिस्रः शब्दशक्तयः स्वीकृताः। प्राचीनैः आलङ्कारिकैरपि इमाः एव शब्दशक्तयः स्वीकृताः। परन्तु अलङ्कारशास्त्रपरम्परायां ध्वनिसिद्धान्तस्य परिप्रकाशानन्तरं व्यञ्जनाशक्तिः स्वीक्रियते।

साहित्यिकाः शब्दः त्रिविधः इति स्वीकुर्वन्ति। यथा वाचकः, लाक्षणिकः, व्यञ्जकश्च। यदुक्तं मम्मटेन–

"स्याद् वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकत्रिधा। "[i]

प्रत्येकस्य शब्दस्य अर्थः विद्यते अतः अर्थः अपि वाच्यलक्ष्यव्यङ्ग्यभेदेन त्रिविधः। तद्यथा –

"वाच्यादयस्तदर्थाः स्युः। "[ii]

विश्वनाथेनापि उक्तमस्ति –

"अर्थो वाच्यश्च लक्ष्यश्च व्यङ्ग्यश्चेति त्रिधा मतः। "[iii]

शब्दात् अर्थस्य प्रतीतिः शक्तिमाध्यमेन भवति। अतः शक्तिरपि त्रिविधा। तद्यथा – अभिधा, लक्षणा, व्यञ्जना इति। वाचकशब्दात् वाच्यार्थस्य प्रतीतिः अभिधाशक्त्या, लाक्षणिकशब्दात् लक्ष्योऽर्थस्य प्रतीतिः लक्षणाशक्त्या एवञ्च व्यञ्जकशब्दात् व्यङ्ग्यार्थस्य प्रतीतिः व्यञ्जनाशक्त्या भवति। यदुक्तं विश्वनाथेन –

"वाच्योर्थोऽभिधया बोध्यो लक्ष्योलक्षणया मतः।
व्यङ्ग्यो व्यञ्जनया ताः स्युस्तिस्रः शब्दस्य शक्तयः॥ "[iv]

**व्यञ्जना –**

व्यञ्जयतीति व्युत्पत्त्या (वि + अञ्जु + णिच् + ल्युट् + टाप) व्यञ्जनाशब्दो निष्पन्नः। अतः आनन्दवर्धनाचार्यतः आरभ्य पण्डितराजजगन्नाथं यावत् ये खलु प्रसिद्धाः आलङ्कारिकाः आसन् ते सर्वे व्यञ्जनाव्यापारं प्रतिपादितवन्तः।

यदुक्तं विश्वनाथेन –

"विरतास्वभिधाद्यासु ययाऽर्थो बोध्यतेऽपरः।
सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च॥ "[v]

तत्र वृत्तौ सः प्रकाशयति - शब्दबुद्धिकर्मणां विरम्य व्यापाराभावः इति न्यायेन अभिधा – लक्षणा – तात्पर्याख्यासु तिसृषु वृत्तिषु स्वं स्वमर्थं प्रतिपाद्य विरतासु यया वृत्त्या अन्यः अर्थः बोध्यते सा व्यञ्जनध्वननगमनप्रत्यायनादिव्यपदेशविषयाशक्तिः व्यञ्जना नाम। साहित्यशास्त्रे ध्वनितत्त्वं सर्वोत्कृष्टं भवति। यथा वस्तुध्वनिः, अलङ्कारध्वनिः, रसध्वनिः इति। तत्र वस्तु वाच्यं भवति, व्यङ्ग्यमपि भवति। अलङ्कारोऽपि तथा। परन्तु रसः स्वप्नेऽपि न वाच्यः स तु वाच्याद् भिन्नः अर्थात् ध्वनिः। सर्वदा व्यङ्गरूपः। आनन्दवर्धनाचार्येण ध्वन्यालोके काव्यात्मनिरूपणप्रसङ्गे व्यञ्जनायाः महत्त्वमित्थं प्रतिपादितम् –

"यत्रार्थः शब्दो वा तमर्थमुपसर्जनी कृतस्वार्थौ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः॥ "[vi]

स्वश्च अर्थश्च स्वार्थः तौ स्वार्थौ गुणीकृतात्मनौ कमपि अद्भुतमर्थमभिव्यङ्क्तः, तत्र ध्वनिः भवतीति सूरिभिः कथितः। कारिकायाम् –

"यत्रार्थः शब्दो वा इत्यत्र वा शब्दः समुच्चयार्थको व्यङ्क्तः इति द्विवचनस्य सार्थकता भवति। यतो हि एकस्य व्यञ्जकत्वे यदन्यस्य सहकारिता। "[vii]

अतः ध्वन्यार्थवबोधधार्थं व्यञ्जनावृत्तेः आवश्यकता नितरां प्रतिभाति। आनन्दवर्धनः ध्वन्यालोके व्यञ्जनावृत्त्या परिपोषिता, व्यङ्ग्यार्थ – द्योतिका ध्वनेर्माहात्म्यसम्बन्धाकारिका विलक्षणरीत्या प्रकाशयति। तद्यथा –

"प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।
यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु॥ "[viii]

अलङ्कारेषु ध्वनेरन्तर्भाव कदापि न भविष्यति इत्यस्मिन् प्रकरणे तेनोक्तम् –

"तत्परावेव शब्दार्थौ यत्र व्यङ्ग्यं प्रतिस्थितौ।
ध्वनिः स एव विषयो मन्तव्यः सङ्करोज्झितः॥ "[ix]

**भाक्तवादीनां मतखण्डनप्रकरणे सः प्रकाशयति –**

"व्यञ्जकत्वैकमूलस्य ध्वनेः स्याल्लक्षणं कथम्। "[x]

**रसध्वनिप्रकरणे पुनः तेनोक्तम् –**

"वाच्यवाचकचारुत्वहेतुनां विविधात्मनाम्।
रसादिपरता यत्र स ध्वनेर्विषयो मतः॥ "[xi]

**अपि च –**

"उक्त्यान्तरेणाशक्यं यच्चारुत्वं प्रकाशयन्।
शब्दो व्यञ्जकतां बिभ्रद्ध्वन्युक्तेर्विषयी भवेत॥ "[xii]

काव्यप्रकाशकारः मम्मटाचार्यः आनन्दवर्धनस्य ध्वनेर्लक्षणं स्वीकृत्य उत्तमकाव्यस्य लक्षणमेवं प्रतिपादयति –

"इदमुत्तममतिशयिनि व्यङ्गे वाच्यात् ध्वनिः बुद्धैः कथितः॥"[xiii]

अर्थात् तदेव उत्तमकाव्यं भवितुमर्हति यत्र वाच्यार्थापेक्षया व्यङ्ग्यार्थस्य सौन्दर्यं चमत्कारजनं भवति। एवञ्च वाच्यार्थापेक्षया व्यङ्ग्यार्थस्य चारुत्वम् अनुपमसौन्दर्यजनकं भविष्यति। सर्वादौ अलौकिकसौन्दर्यमित्यस्यार्थो भवति व्यङ्ग्यार्थः। तस्य साधिका भवति व्यञ्जनावृत्तिः।

तदुक्तं वृत्तौ इदमिति काव्यम् बुद्धैः वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः। अस्मिन् प्रकरणे ध्वन्यालोकारः आनन्दवर्धनः ध्वन्यालोके प्रतिपादयति "प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात् सर्वशास्त्राणाम्। ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति।"[xiv]

अतः मम्मटेन व्यञ्जनायाः लक्षणमेवं प्रतिपादितम् –

"यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते।
फले शब्दैकगम्येऽत्र व्यञ्जनान्नापराक्रिया॥ "[xv]

अत्र वृत्तौ तेनोक्तम् – प्रयोजनप्रतिपिपादविषया यत्र लक्षणया शब्दप्रयोगस्तत्र नान्यतस्तत्प्रतीतिरपि तु तस्मादेव शब्दात्। नात्र व्यञ्जनादृतेऽन्यो व्यापारः। मम्मटस्य अयमेव सिद्धान्तः यत् प्रयोजनवत्यां लक्षणायां व्यञ्जनाव्यापारेण प्रयोजनस्य ज्ञानं भवति। गङ्गायां घोषः इत्यादौ जलप्रवाहे घोषः इति वाच्यार्थभूतः मुख्यार्थः बाधितः भवति। ततः सामीप्यसम्बन्धात् तटे घोषः इति लक्ष्यार्थः लक्ष्यते। परन्तु यया वृत्त्या शीतत्वापावनत्वरूपप्रयोजनं द्योत्यते सा वृत्तिः व्यञ्जना। येन व्यापारेण व्यङ्ग्यस्य ज्ञानं भवति सः व्यापारः व्यञ्जनाव्यापारः। इयं व्यञ्जना तावत् लक्षणामूला व्यञ्जना इति कथ्यते।

साहित्यशिरोमणिः आचार्यविश्वनाथकविराजः मम्मटस्य मार्गमनुसरन् द्वितीयपरिच्छेदे "विरतास्वभिधाद्यासु" [xvi] इति व्यञ्जनायाः लक्षणं कुर्वन् पञ्चमपरिच्छेदे रसविषयालोचनप्रसङ्गे केयमभिनवा व्यञ्जना नाम वृत्तिरिति प्रतिपादयति। तद्यथा –

"वृत्तीनां विश्रान्तेरभिधातात्पर्यलक्षणाख्यानाम्।
अङ्गीकार्या तुर्या वृत्तिर्बोधे रसादीनाम्॥ "[xvii]

विश्वनाथः व्यञ्जनावृत्तिं तुरीयावृत्तिरिति कथयति। तुरीयावृत्तिरित्युक्तौ चतुर्थीवृत्तिरिति अङ्गीकार्या। अर्थात् अभिधालक्षणातात्पर्याख्यवृत्तीनां विश्रान्तेरनन्तरं रसभावादीनां ज्ञानाय व्यञ्जना नाम्नी तुरीयावृत्तिरङ्गी कर्तव्या।

सेयं व्यञ्जना शाब्दी आर्थी भेदेन द्विधा। यत्र शब्दपरिवर्तनेन अर्थस्य क्षतिः भवति तत्र शाब्दीव्यञ्जना। यत्र शब्दपरिवर्तनेन अर्थस्य क्षतिः न भवति तत्र आर्थीव्यञ्जना।

शाब्दीव्यञ्जना –

शाब्दीव्यञ्जना द्विधा अभिधामूला लक्षणामूला चेति। अभिधामूलाव्यञ्जनायाः लक्षणं यदुक्तं मम्मटेन

"अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते।
संयोगाद्यैरवाच्यार्थधीकृद्व्यापृत्तिरञ्जनम्॥ "[xviii]

**विश्वनाथेनाऽपि उक्तमस्ति –**

"अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते।
एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साऽभिधाश्रया॥ "[xix]

अनेकार्थस्य शब्दस्य एकस्मिन् अर्थे संयोगप्रभृतिभिः नियमिते सति या अन्यार्थबोधहेतुः सा अभिधामूला व्यञ्जना।

नानार्थबोधकस्य शब्दस्य एकत्रार्थे अभिधया नियमने संयोगादयो हेतवो भवन्ति। तथोक्तं भर्तृहरिणा –

"संयोगो विप्रयोगश्च साहचर्यो विरोधिता।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः॥
सामर्थ्यमौचिती देशः कालौ व्यक्ति स्वरादयः।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः॥ "[xx]

- ❖ संयोगः – यथा 'सशंखचक्रो हरिः' इत्यत्र शंखचक्रसंयोगः हरिशब्दस्य वाचकत्वं विष्णौ नियमयति।
- ❖ विप्रयोगः – यथा 'अशंखचक्रो हरिः' इत्यत्र वियोगस्य संयोगपूर्वकत्वात् शंखचक्रवियोगेन हरिशब्दस्य वाचकत्वं विष्णौ नियम्यते।
- ❖ साहचर्यम् – यथा 'रामलक्षणौ' इत्यत्र रामशब्दस्य वाचकत्वं लक्षणस्य साहचर्येण दशरथे नियम्यते।
- ❖ विरोधिता – यथा 'रामार्जुनगतिस्तयोः' इत्यत्र विरोधित्वात् रामो भार्गवः अर्जुनश्च कात्तवीर्यः।
- ❖ अर्थः – यथा 'स्थाणुं भज भवच्छिदे' इत्यत्र स्थाणुशब्दस्य वाचकत्वं भवच्छेदनरूपेण फलेन शिवे नियम्यते।
- ❖ प्रकरणम् – यथा 'सर्वं जानाति देवः' इत्यत्र देवशब्दस्य वाचकत्वं प्रकरणेन प्रकृते राजनि नियम्यते।
- ❖ लिङ्गम् – यथा 'कुपितो मकरध्वजः' इत्यत्र मकरध्वजशब्दस्य वाचकत्वं कोपरूपात् असाधारणधर्मात् कामे नियम्यते।
- ❖ अन्यशब्दसन्निधिः – यथा 'देवस्य पुरारातेः' इत्यत्र देवपदस्य वाचकत्वं पुरारातिशब्दसमभिहारेण शिवे नियम्यते।
- ❖ सामर्थ्यम् – यथा 'मधुना मत्तः कोकिलः' इत्यत्र मधुशब्दस्य वाचकत्वं कोकिलामादनसामर्थ्येन वसन्ते नियम्यते।
- ❖ औचिती – यथा 'पातु वो दयितामुखम्' इत्यत्र मुखशब्दवाचकत्वम् औचित्या साम्मुख्ये नियम्यते।
- ❖ देशः – यथा 'भात्यत्र परमेश्वरः' इत्यत्र परमेश्वरशब्दस्य वाचकत्वम् अत्रेति राजधानीरूपदेशेन राजनि नियम्यते।
- ❖ कालः – यथा 'चित्रभानुर्विभाति' इत्यत्र अनेकार्थकस्य चित्रभानुपदस्य वाचकता दिने प्रयोगे सति सूर्ये नियम्यते, रात्रौ प्रयोगे सति च अग्नौ नियम्यते।
- ❖ व्यक्तिः – यथा 'मित्रं भाति' इत्यत्र अनेकार्थकस्य मित्रशब्दस्य वाचकत्वं नपुंसकलिङ्गव्यक्त्या सुहृदि, मित्रो भाति इति पुंल्लिङ्गव्यक्त्या च सूर्ये नियम्यते।
- ❖ स्वरादयः – यथा

'एतावन्मात्रस्तनिका एतावन्मात्राभ्यामक्षिपत्राभ्याम्।
एतावन्मात्रावस्था एतावन्मात्रैर्दिवसैः॥ '[xxi]

**इत्यत्र हस्तचेष्टादिभिः स्तनादीनां कमलकोरकाद्याकारत्वं द्योत्यते।**

**उदाहरणं यथा –**

"भद्रात्मनो दुरधिरोहतनोर्विशालवंशोन्नतेः कृतशिलीमुखसङ्ग्रहस्य।
यस्यानुपल्पुगतेः परवारणस्य दानाम्बुसेकसुभगः सततं करोऽभूत्॥ "

अत्र श्लेषाश्रयेण राजस्तुतिकपार्थे बोधिते हस्तिरूपोऽन्योऽर्थोऽपि व्यञ्जनया बोध्यते। विश्वनाथेनाऽपि उदाहरति – "दुर्गालङ्घितविग्रहो मनसिजम्। "[xxii]

लक्षणमूला व्यञ्जना – लक्षणामूला व्यञ्जनायाः लक्षणं मम्मटेन प्रतिपादितं तद्यथा –

"यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते।
फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया॥ "[xxiii]

**यदुक्तं विश्वनाथेन –**

"लक्षणोपास्यते यस्य कृते तत्तु प्रयोजनम्।

यया प्रत्याय्यते सा स्यात् व्यञ्जना लक्षणाश्रया॥ "[xxiv]

उदाहरणं यथा – गङ्गायां घोषः अत्र शीतत्वं पावनात्वादि प्रयोजनं व्यङ्ग्यं लक्षणानन्तरमागच्छतीति कृत्वा अत्र लक्षणामूलव्यञ्जना भवति।

आर्थीव्यञ्जना –

आर्थीव्यञ्जनायाः लक्षणं मम्मटेन प्रतिपादितं तद्यथा –

"वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसन्निधेः।
प्रस्तावदेशकालादेर्वैशिष्ट्यात् प्रतिभाजुषाम्॥
योऽर्थस्यान्यार्थधीहेतुर्व्यापारो व्यक्तिरेव सा॥ "[xxv]

**विश्वनाथेनापि उक्तमस्ति तद्यथा –**

"वक्तृबोद्धव्यवाक्यानामन्यसन्निधिवाच्ययोः।
प्रस्तावदेशकालानां काकोश्चेष्टादिकस्य च।
वैशिष्ट्यादन्यमर्थं या बोधयेत् सार्थसम्भवाः॥ "[xxvi]

अत्र तात्पर्यमिदं यत् वक्तृबोद्धव्यादिवैशिष्ट्यबलेन यत्र प्रतिभाशालिनां विदुषाम् एकस्मात् अर्थात् अर्थान्तरबोधः भवति तत्र सः अर्थान्तरबोधः आर्थीव्यञ्जनाबोध्यः भवति। अत्र अर्थान्तरबोध – निमित्तं समीचीनानि उदाहरणानि विश्वनाथेन मम्मटेन वा प्रतिपादितानि।

वक्तृवाक्यप्रस्तावदेशकालवैशिष्ट्ये यथा –

"कालो मधुः, कुपित एष च पुष्पधन्वा,
धीरा वहन्ति रतिखेदहराः समीराः।
केलीवनीयमपि वञ्जुलकुञ्जमञ्जु-
दूरे पतिः कथय किं करणीयमद्य ?॥ "[xxvii]

**बोद्धव्यवैशिष्ट्ये यथा** –

निःशेषच्युतचन्दनं स्तनतटं, निर्मृष्टरागोऽधरो
नेत्रेदूरमनञ्जने, पुलकिता तन्वी तवेयं तनुः।
मिथ्यावादिनि ! दूति !बान्धवजनस्याज्ञतपीडागमे!
वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम्॥ [xxviii]

अत्र तदन्तिकमेव रन्तुं गतासीति विपरीतलक्षणया लक्ष्यम्। तस्य च रन्तुमिति व्यङ्ग्यं प्रतिपाद्य दूतीवैशिष्ट्याद् वोध्यते।

**अन्यसंनिधिवैशिष्ट्ये यथा –**

पश्य निश्चलनिस्पन्दा बिसीनीपत्रे राजते बलाका।
निर्मलमरकतभाजनपरिस्थिता शङ्खशुक्तिरिव॥ [xxix]

अत्र बलाकाया निःस्पन्दत्वेन विश्वस्ततवम्, तेनास्य देशस्य निर्जनत्वम् अतः संकेतस्थानमेतदिति कयापि संनिहितं प्रच्छन्नकामुकं प्रत्युच्यते। अत्रैव स्थाननिर्जनत्वरूपं व्यङ्ग्यार्थवैशिष्ट्यं प्रयोजनम्।

**काकुवैशिष्ट्ये यथा** –

"भिन्नकण्ठध्वनिर्धीरैः काकुरित्याभिधीयते। "उदाहरणं यथा–
"गुरुपरतन्त्रतया बत दूरतरं देशमुद्यतो गन्तुम्।
अलिकुलकोकिलललिते नैष्यति सखि ! सुरभिसमयेऽसौ?"[xxx]

प्रवासोद्यतभर्तृकाया नायिकाया सखीं प्रत्युक्तिरियम्। हे सखि ! मम नायकः अस्मिन् सुरभिसमये किं नैष्यति? इति काकाप्रश्नतः एष्यति एव इति विधिरूपोऽर्थः व्यज्यते।

**चेष्टावैशिष्ट्ये यथा** –

संकेतकालमनसं विटं ज्ञात्वा विदग्धया।
हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम्॥ [xxxi]

अत्र सन्ध्या संकेतकाल इति पद्मनिमीलनादिचेष्टया कयाचिद्द्योत्यते।

एवं द्विधा व्यञ्जना। व्यञ्जकत्वे शब्दार्थयोः मिथः सहकारिता भवतीत्याह साहित्यदर्पणकारः –

"शब्दार्थबोध्यो व्यनक्त्यर्थः शब्दोऽप्यर्थान्तराश्रयः।
एकस्य व्यञ्जकत्वे तदन्यस्य सहकारिता॥ "[xxxii]

पण्डितराजजगन्नाथकृते शब्दशक्तिविवेचने किञ्चिद् वैलक्षण्यं वर्तते। वृत्तिनिरूपणे तेन अभिधायाः लक्षणायाश्च विवेचनं कृतम्। परन्तु यद्यपि व्यञ्जनायाः स्वरूपं न प्रतिपादितं तथापि असौ महान् व्यञ्जनावादी आसीदिति शब्दशक्तिमूलध्वनेः विवेचनप्रसङ्गे स्वतः ज्ञायते। तद्यथा –

"योगरूढस्य शब्दस्य योगे रूढया नियन्त्रिते।
धियं योगस्पृशोऽर्थस्य या सूते व्यञ्जनेव सा॥ "[xxxiii]

**काव्यलक्षणनिरूपणप्रसङ्गेऽपि तेनोक्तम् –**

"रमणीयार्थप्रतिपादकः शब्दः काव्यम्। "[xxxiv]

तत्र का नाम रमणीयता इति प्रसङ्गे यदुक्तं – "रमणीयता च लोकोत्तरानन्दजनकज्ञानगोचरता" [xxxv] लोकोत्तरानन्दानुभूतिः व्यञ्जनावृत्तिं विना नैव सम्भवति। एवञ्च उत्तमोत्तमकाव्यस्य लक्षणप्रसङ्गे तथोक्तम् – "शब्दार्थौ यत्र गुणीकृतात्मानौ कमप्यर्थमभिव्यङ्क्तः तत् आद्यम्। "[xxxvi]

अतः अनेन प्रकारेण शब्दशक्तिविमर्शः विभिन्नविदुषां मतानुसारेण यथामतिः उपस्थापित इति दिक्।

**सन्दर्भग्रन्थसूची-**


1. संस्कृतसाहित्येतिहासः – आचार्यलोकमणिदाहालः, चौखम्बाकृष्णदास अकादमी, वाराणसी।
2. संस्कृत साहित्य का अभिनव इतिहास – डा. राधावल्लभ त्रिपाठी, विश्वविद्यालय प्रकाशन वाराणसी।
3. संस्कृत साहित्य का इतिहास – आचार्य वलदेव उपाध्याय, शारदा निकेतन वाराणसी, २२१०१०।
4. साहित्यदर्पणम् (चन्द्रकला संस्कृत-हिन्दी व्याख्योपेतम्) – व्याख्याकारः आचार्य शेषराजशर्मा रेग्मी, चौखम्बा कृष्णदास अकदमी, वाराणसी।
5. काव्यप्रकाशः – झलकीकरोपनाम्ना रामभट्टात्मजेन भट्टवामनाचार्येण विरचितया बालबोधिन्याख्याटीकया समन्वितः, चौखम्बा संस्कृत प्रतिष्ठान दिल्ली।
6. ध्वन्यालोकः (लोचनसहितः, प्रकाश हिन्दीव्याख्योपेतश्च) – व्याख्याकारः आचार्यजन्ननाथपाठकः, चौखम्बा विद्याभवन वाराणसी।
7. रसगङ्गाधरः (चन्द्रिकासंस्कृतहिन्दीव्याखोपेतम्) – व्याख्याकारः श्री मदनमोहनझा, चौखम्बा विद्याभवन वाराणसी।
8. नाट्यशास्त्रम् (नाट्यचन्द्रिका-संस्कृत-हिन्दीव्याखोपेतम्, प्रथमो भागः)- सम्पादिका सुधा रस्तोगी, चौखम्बा कृष्णदास अकादमी, वाराणसी।
9. व्यक्तिविवेकः (मणि-व्याख्यासहितः) – व्याख्याकारः आचार्यः सूर्यमणिरथः, सांविदी-प्रकाशनम्, पुरी।
10. चन्द्रालोकः (हिन्दीसंस्कृतव्याख्योपेतम्) – व्याख्याकारः गङ्गासागररायः, चौखम्बा संस्कृत संस्थान, वाराणसी।

[i] काव्य.प्र. २/५

[ii] तदेव २/६

[iii] सा.द. २/२

[iv] तदेव २/३

[v] सा.द. २/१२,१३

[vi] ध्वन्या. १/१३

[vii] सा.द. १/१८

[viii] ध्वन्या. १/४

[ix] तदेव १/१६

[x] तदेव १/२१

[xi] तदेव २/२४

[xii] तदेव. १/१५

[xiii] का.प्र. १/२

[xiv] ध्वन्या, प्रथमोद्यतः

[xv] का.प्र. २/२३

[xvi] सा.द. २/१२,१३

[xvii] तदेव ५/१

[xviii] का.प्र. २/१९

[xix] सा.द. २/१४

[xx] वा.प. २/३१५, ३१६

[xxi] का.प्र. २.११

[xxii] सा.द. द्वितीयपरिच्छेदः

[xxiii] का.प्र. २

[xxiv] सा.द. २/१५

[xxv] का.प्र. ३/१

[xxvi] सा.द. २/१६

[xxvii] तदेव द्वितीयपरिच्छेदे

[xxviii] तदेव द्वितीयपरिच्छेदे

[xxix] तत्रैव द्वितीयपरिच्छेदे

[xxx] तत्रैव द्वितीयपरिच्छेदे

[xxxi] तत्रैव द्वितीयपरिच्छेदे

[xxxii] तदेव २/१८

[xxxiii] रसगङ्गाधरः - २

[xxxiv] तदेव - १

[xxxv] तदेव - १

[xxxvi] तदेव – १